# ॥ देवीपदपङ्कजाष्टकम् ॥

.. Devipadapankajashtakam ..

sanskritdocuments.org

August 20, 2017

# .. Devipadapankajashtakam ..

# ॥ देवीपदपङ्कजाष्टकम् ॥

## Sanskrit Document Information

Text title : devIpadapaNkajAShTakam

File name : devIpadapaNkajAShTakam.itx

Category : aShTaka, devii

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Latest update : February 10, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ देवीपदपङ्कजाष्टकम् ॥

श्रीगणेशाय नमः ॥

मातस्त्वत्पदपङ्कजं कलयतां चेतोऽम्बुजे सन्ततं
मानाथाम्बुजसम्भवाद्रितनयाकान्तैः समाराधितम् ।
वाञ्छापूरणनिर्जितामरमहीरुङ्गर्वसर्वस्वकं
वाचः सूक्तिसुधारसद्रवमुचो निर्यान्ति वक्त्रोदरात् ॥ १॥

मातस्त्वत्पदपङ्कजं मुनीमनःकासारवासादरं
मायामोहमहान्धकारमिहिरं मानातिगप्राभवम् ।
मातङ्गाभिमतिं स्वकीयगमनैर्निर्मुलयत्कौतुकाद्-
वन्देऽमन्दतपःफलाप्यनमनस्तोत्रार्चनाप्रक्रमम् ॥ २॥

मातस्त्वत्पदपङ्कजं प्रणमतामानन्दवाराान्निधे
राकाशारदपूर्णचन्द्रनिकरं कामाहिपक्षीश्वरम् ।
वृन्दं प्राणभृतां स्वनाम वदतामत्यादरात्सत्वरं
षड्भाषासरिदीश्वरं प्रविदधत्षाण्मातुराच्यं भजे ॥ ३॥

कामं फालतले दुरक्षरततिर्दैवीममस्तां न भी-
र्मातस्त्वत्पदपङ्कजोत्थरजसा लुम्पामि तां निश्चितम् ।
मार्कण्डेयमुनिर्यथा भवपदाम्भोजार्चनाप्राभवात्
कालं तद्वदहं चतुर्मुखमुखाम्भोजातसूर्यप्रभे ॥ ४॥

पापानि प्रशमं नयाशु ममतां देहेन्द्रियप्राणगां
कामादीनपि वैरिणो दृढतरान्मोक्षाध्वविघ्नप्रदान् ।
स्निग्धान्पोषय सन्ततं शमदमध्यानादिमान्मोदतो
मातस्त्वत्पदपङ्कजं हृदि सदा कुर्वे गिरां देवते ॥ ५॥

मातस्त्वत्पदपङ्कजस्य मनसा वाचा क्रियातोऽपि वा
ये कुर्वन्ति मुदाऽन्वहं बहुविधैर्दिव्यैः सुमैरर्चनाम् ।
शीघ्रं ते प्रभवन्ति भूमिपतयो निन्दन्ति च स्वश्रिया
जम्भारातिमपि ध्रुवं शतमखीकष्टाप्तनाकश्रियम् ॥ ६॥

मातस्त्वत्पदपङ्कजं शिरसि ये पद्माटवीमध्यत-
श्चन्द्राभं प्रविचिन्तयन्ति पुरुषाः पीयूषवर्ष्यन्वहम् ।

ते मृत्युं प्रविजित्यि रोगरहिताः सम्यग्दृढाङ्गाश्चिरं
जीवन्त्येव मृणालकोमलवपुष्मन्तः सुरूपा भुवि ॥ ७॥

मातस्त्वत्पदपङ्कजं हृदि मुदा ध्यायन्ति ये मानवाः
सच्चिद्रूपमशेषवेदशिरसां तात्पर्यगम्यं मुहुः ।
अत्यागेऽपि तनोरखण्डपरमानन्दं वहन्तः सदा
सर्वं विश्वमिदं विनाशि तरसा पश्यन्ति ते पूरुषाः ॥ ८॥

इति देवीपदपङ्कजाष्टकं सम्पूर्णम् ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. Devipadapankajashtakam ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*